शिशुचान्द्रायणं स्मृतम्” मनुः। “धृतिरस्तमिता गतिश्च्युता” रघुः। [ पर्स्रीं[द्दत्ते

**अस्तमती** स्त्री अस्तमतति अत–अच्–गौरा० ङीष्। शाल-

**अस्तमन** न० अन–बा–भावेऽप् अस्तम् अस्यस्य अन:गतिः। भगोलकक्षया तिरोधानेन, १ सूर्य्यादेरदर्शनगमने “तिरोधानञ्च यत्रैति तदेवास्तमनं रवेः। नैवास्तमनमर्कस्य नोदयः सर्व्वदा सतः” इति ज्योतिषोक्तेस्तथात्वम् ब०। “उदयास्तमने नाथ! दर्शनादर्शने रवेः” पुरा० “उदयास्तमनज्ञोहि न हृष्यति न शोचति” भा०ब० २५७अ०। सूर्य्यास्तमनवेलायामासेदुस्ते महद्वनम्” भा०आ०प०२अ० “उदयास्तमने भानुः प्रदक्षिणमवर्त्तत” भा०भी०प०। २तत्काले च।

**अस्तमय** पु० अस्तोमीयते ज्ञायते यत्र मिन्–अच् वा न आत्। १प्रलये, २सूर्य्यादेरदर्शने “करोत्यकालास्तमयं विवस्वतः” किरा०। “उदयस्तनाम सवितुस्तन्निवासिनां प्राणिनां चक्षुर्गोचरापत्तिस्तदत्ययश्चास्तमयः न परमार्थत उदयोऽस्तमयोवा” तन्निवासिनाञ्च प्राणिनामभावे तान् प्रति तेनैव मार्गेण गच्छन्नपि नैवोदेता नास्तमेतेति चक्षुर्गोचरतापत्तेस्तदत्ययस्य च तत्राभावात्” छा०उ०भाष्यम्। तथा च भूवृत्ताद्धान्तरालस्थानएवोदयास्तमयौ भवतः “लङ्कापुरेऽर्कस्य यदोदयः स्यात् तदा दिनार्द्धं यमकोटिपुर्य्याम्। अधस्तदा सिद्धपुरेऽस्तकालःस्याद्रोमके रात्रिदलं तथैव” सि०शि०। भूवृत्तचतुर्थांशे स्थितानां पुरांमध्ये प्रथमपुर्य्यामुदये तृतीयेऽस्तत्वोक्तेस्तथात्वम्। शा० भाष्ये तु यदाऽमरावत्यां मध्याह्नगतः सविता तदा संयामिन्यामुद्यन् दृश्यते तत्र मध्याह्नगोचरोवारुण्यामुद्यन् दृश्यते इत्युक्तम्” ग्रहाणां च सूर्य्यस्यातिप्रत्यासत्त्या प्रकाशाभावोऽस्तत्वम् तद्वियोगे चोदयः। “रविणास्तमयोयोगो वियोगस्तूदयो भवेत्” इत्युक्तेः अन्यग्रहाणां ३ रवियोगे च।

**अस्तरण** न० अभावे न०त०। स्तरणाभावे। तत्र दीयते कार्य्यम् वा व्युटा० अण्। आस्तरणम् तत्र देये कार्य्ये च त्रि०।

**अस्ताघ** त्रि० अस्तमघं कालुष्य–यत्र। अतिगभीरे हेम०।

**अस्ताचल** पु० अस्यन्ते किरणा यत्र आधारे क्त कर्म०। पश्चिमाचले अस्तगिरौ। “अस्ताचलचूडावलम्बिनि भगवति मरीचिमालिनि” काद०। अस्ताद्रिप्रभृतयोऽप्यत्र।

**अस्ति** अव्य० अस्–श्तिप्। १स्थितौ, विद्यमानतायाञ्च “अस्ति नास्ति न जानातीति” चाण०। २तद्वति च अस्तिक्षीरा अस्तिपरलोक इति मतिर्यस्य आस्तिकः नास्तिकः। चतुरर्थ्यां पक्षा० फक्। आस्तायनः। तत्सन्निकृष्टदेशादौ त्रि०।

**अस्तिकाय** पु० अस्ति कायः स्वरूपं यस्य। जैनमतसिद्धे विद्यमानतास्वरूपे पदार्थभेदे। अस्तिकायाश्च पञ्चविधाः जीवास्तिकायः पुद्गलास्तिकायः धर्म्मास्तिकायः अधर्म्मास्तिकायः आकाशास्तिकायश्चेति अर्हच्छब्दे ३८६ पृष्ठे विवरणम्। शा०भाष्ये तन्मतमुन्यस्य निराकृतं यथा “सर्व्वेषामप्यन्येषामवान्तरप्रभेदान् बहुविधान् स्वसमयपरिकल्पितान् वर्णयन्ति। सर्वत्र चेमं सप्तभङ्गीनयन्यायमवतारयन्ति। स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च स्याद वक्तव्यः स्यादस्ति चावक्तव्यः स्यान्नास्ति चावक्तव्यः स्यादस्ति नास्तिचावक्तव्यश्चेति। एवमेवैकत्वनित्यत्वादावपीमं सप्तभङ्गीनयं योजयन्ति। अत्राचक्ष्महे नायमभ्युपगमोयुक्त इति। कुतः “एकस्मिन्नसम्भवात्” सू०। नह्येकस्मिन् धर्म्मिणि युगपत्सदसत्त्वादिविरुद्धधर्मसमावेशः सम्भवति शीतोष्णवत्। यएते सप्त पदार्था निर्द्धारिता एतावन्त एवंरूपाश्चेति ते तथैव वा स्युः। नैव वा तथा स्युः। इतरथा हि तथा वा स्युर्न तथा वेत्यनिर्द्धारितरूपं ज्ञानं संशयज्ञानवदप्रमाणमेव स्यात्। ननु अनेकात्मकं वस्त्विति निर्द्धारितरूपमेव ज्ञानमुत्पद्यमानं संशयज्ञानवन्नाप्रमाणं सम्भवितुमर्हति। नेति ब्रूमः निरङ्कुशं ह्यनेकान्तं सर्व्ववस्तु प्रतिजानानस्य निर्द्धारणफलस्यापि वस्तुत्वाविशेषात् स्यादस्तिस्यान्नास्तीत्यादिविकल्पोपनिपातादनिर्द्धारणात्मकतैव स्यात्। एवं निर्द्धारयितुर्निर्द्धारणफलस्य च स्यात्। पक्षेऽस्तिता स्याच्चापक्षे नास्तितेत्येवं सति कथं प्रमाणभूतः संस्तीर्थकरः प्रमाणप्रमेयप्रमातृप्रमितिष्वनिर्द्धारितास्मूपदेष्टुं शक्नुयात् कथं वा तदभिप्रायानुसारिणस्तदुपदिष्टेऽर्थेऽनिर्द्धारितरूपे प्रवर्त्तेरन्। ऐकान्तिफलत्वनिर्द्धारणे हि सति तत्साधनानुष्ठानाय सर्व्वोलोकोऽनाकुलः प्रवर्त्तते नान्यथा। अतश्चानिर्द्धारितार्थं शास्त्रं प्रणयन्मत्तोन्मत्तवदनुपादेयवचनः स्यात्। तथा पञ्चानामस्तिकायानां पञ्चत्वसंख्यास्ति वा नास्ति वेति विकल्प्यमानं स्यादिति तदेकस्मिन् पक्षे। पक्षान्तरे तु न स्यादित्यतोन्यूनसंख्यात्वमधिकसंख्यात्वं वा प्राप्नुयात्! नचैषां पदार्थानामवक्तव्यत्वं सम्भवति अवक्तव्याश्चेन्नोच्येरन् उच्यन्ते चावक्तव्याश्चेति विप्रतिषिद्धम्। उच्यमानाश्च तथैवावधार्य्यन्ते नावधार्य्यास्च इति च तथावदवधारणफलं सम्यग्दर्शनमस्ति वा नास्ति